K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

## ॥ जातकर्म नामकरण निष्क्रमणाऽन्नाऽशनप्रकरणानि ॥

जाते सुते पिता स्नायान्नान्दीश्राद्धं विधानतः। जातकर्म ततः कुर्यादैहिकामुष्मिकप्रदम्॥ सौवर्णे राजते वाऽपि पात्रे कांस्य-मयेऽपि वा। मधुसर्पिर्निषिच्याथ हिरण्येनावघर्षयेत्॥ प्राशयेत्तं हिरण्येन कुमारं मधुसर्पिषी। प्रते मन्त्रं पठेत्कर्णे हिरण्यं स्थाप्य दक्षिणे॥ तथा वामे जपेन्मेधां स्पृशेदंसावतः परम्। अश्मा भव जपेदिन्द्रः श्रेष्ठान्यस्मे प्रयन्धि च॥ एवं कुर्यात्सुतस्यैव तूष्णीमेव च योषितः। केचिदिच्छन्त्यनादिष्टहोममन्त्रादिनापरे॥

---- लघु अश्वलायन स्मृति पञ्चमोऽध्यायः॥

अहन्येकादशे कुर्यान्नामकर्म विधानतः। कृत्वाऽभ्युदयिकं श्राद्धं द्वादशे षोडशेऽपि वा॥ मार्गशीर्षं समारभ्य मासानां नाम निर्दिशेत्। नक्षत्रपादतो जातजन्मनाम तदुच्यते॥ यद्वा तातपि-(ताना)तुर्नाम भवेत्संव्यावहारिकम्। क्रमेणानेन संलिख्य नामानि च समर्चयेत्॥ समाक्षरयुतं नाम भवेत्पुंसः सुखप्रदम्। विषमं यदि तत्र श्री समेतं च विनिर्दिशेत्॥ आचार्येणात्र मन्त्रोयं नामानि तु उदाहृतः। नमस्करोत्यसौ देवं ब्राह्मणेभ्यः पिता बदेत्॥ त्रिस्त्रिः स्यात्प्रतिनामैवं ततः स्वस्तीति निर्दिशेत्। भवन्तोऽस्य ब्रुवन्त्वेवं प्रतिब्रूयुस्तथा द्विजाः॥ तत्तन्नाम शिशो-

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

स्त्रिस्त्रिर्ब्रूयात्तत्र तथाऽशिषः। ब्राह्मणान्भोजयेच्छक्त्या भुञ्जीयात्सह बन्धुभिः॥ ---- लघु अश्वलायन स्मृति षष्ठोऽध्यायः॥

मासे चैव चतुर्थे तु कुर्यान्निष्क्रमणं शिशोः। कृत्वाऽभ्युदयिकं श्राद्धमादायाङ्के शिशुं पिता॥ स्वस्ति नो मिमीतां सूक्तं जपन् देवालयं नयेत्। आशुः शिशान इत्येतत्पठन्तं श्वशुरालयम्॥ नीत्वाऽन्यस्य गृहं वाऽपि प्राङ्गणे वाऽर्कमीक्षयेत्। तच्चक्षुरिति मन्त्रेण दृष्ट्वार्कं प्रविशेद्गृहम्॥

---- लघु अश्वलायन स्मृति सप्तमोऽध्यायः॥

षष्ठेऽन्नप्राशनं कुर्यान्मासे पुंस्यष्टमेऽथ वा। दशमे द्वादशे मासि केचिदेवं वदन्ति हि॥ कृत्वाऽभ्युदयिकं श्राद्धं शुभे चैव दिने पिता। सौवर्णे राजते पात्रे कांस्ये वाऽथ नवे शुभे॥ क्षीराज्य-मधुदध्यन्नं विधाय प्राशयेच्छिशुम्। मन्त्रेणान्नपतेऽन्नस्य हिरण्येन स्रुवेण च॥ पाणिना सपवित्रेण जलञ्चापि हि पाययेत्। दत्वा विप्राय तत्पात्रं तूष्णीमेव च योषितः॥ ततो विभवसारेण ब्राह्म-णांश्चापि भोजयेत्। स्वयञ्चैव तु भुञ्जीयात्समाहितमना भवेत्॥

---- लघु अश्वलायन स्मृति सप्तमोऽध्यायः॥

---

जताऽशौचान्ते, द्वादशे, षोडशे वा दिने जातकर्मनामकरणे, चतुर्थे मासि निष्क्रमणं, षष्ठेऽष्टमे दशमे द्वादशे वाऽन्नप्राशनञ्च

Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

कार्यम्॥ तदुक्तकालातीते अर्वाक्संवत्सरात् चन्द्रतारा-बलान्विते शुभे दिने बा॥ देवताप्रार्थना। पुण्याहबाचनम्। नान्दीश्राद्धम् ॥

## जातकर्म

**सङ्कल्प-** ममास्य कुमारस्य गर्भाऽम्बुपानजनितसर्व-दोषनिर्हरणाऽयुर्मेधाऽभिवृध्यर्थं जातकर्म करिष्ये॥

**मधुसर्पिषी** विषमतया मिश्रयित्या, शिलाणण्डे सुवर्णेन सम्यगवघृष्य, हिरण्ये, राजते, कांस्ये वा पात्रे तन्निधाय, हिरण्येनेव त्रिः प्राङ्मुखं शिशुं प्राशयेत्-

हिरण्यगर्भः। सविता। त्रिष्टुप्॥

प्र ते ददामि मधुं नो घृतस्य वेदं सवित्रा प्रसूतं मघोनाम्।
आयुष्मान्गुप्तो देवताभिःशतं जीव शरदो लोके अस्मिन्॥

शिशुमात्मनः मुखसमीपमानीय, तद्धिरण्यं क्रमात् दक्षिणवामकर्णयोः निधाय, **मेधाजपम्**।(मन्त्रावृत्तिः)

हिरण्यगर्भः। सवितासरस्वत्यश्विनो। अनुष्टुप्॥

मेधान्ते देवः संविता मेधां देवी सरस्वती।
मेधान्ते अश्विनौ देवावाधंतां पुष्करस्रजौ॥

**शिशोरंसाभिमर्शनम्-** अश्मा भव परशुर्भव हिरण्यमस्तृतं

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

भव। वेदो वै पुत्रनामाऽसि स जीव शरदः शतम्॥

गृत्समदः भार्गवः शुनकः। इन्द्रः। त्रिष्टुप्॥

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे। पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम्॥

आङ्गिरसः घोरः। इन्द्रः। त्रिष्टुप्॥ अस्मे प्र यन्धि मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः। अस्मे शतं शरदो जीवसे धा अस्मे विराञ्छश्वंत इन्द्र शिप्रिन्॥

शिशोः **मूर्धानमाजिघ्रेत्-** अङ्गादङ्गात्सं भवसि हृदयादधि जायसे। आत्मा वै पुत्रनामाऽसि स जीव शरदः शतम्॥

दक्षिणस्तनं हिरण्यसहितोदकेन प्रक्षाल्य, शिशोः **स्तन्यपानम्-** इमां कुमारो जरां धयतु दीर्घमायुः प्रजीवसे। अस्मै स्तनौ प्रयुञ्जानावायुर्वर्चो यशो बलम्॥

## नामकरण

**सङ्कल्प-** ममास्य कुमारस्य आयुरभिवृद्धिव्यावहारिक-ज्ञानसिध्यर्थं नामकरणकर्म करिष्ये॥

कंस्यादिपात्रे श्वेततण्डुलान् प्रसार्य, सुवर्णशलाकया,

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

हरिद्राखण्डेन वा स्वेष्टदेवता, मास, नक्षत्र, व्यावहारिक इति नामचतुष्टयं च संलिख्य पूजनम्-

तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम्।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय॥

नामचतुष्टयदेवताभ्यो नमः ॥ सुलग्नतार्थं फलादिदानम्।

शिष्टाचारात् प्राङ्मुखशिशोः दक्षिणेकर्णे त्रिः **"अमुक नामासि"** इति वाचनम्। **स्वस्तिवाचनम्।**

ब्राह्मणाः- इयंकुमारः अमुकनाम्ना देवं नमस्करोति। त्रिः॥

पिता- अमुकगोत्रोत्पन्नः अयं कुमारः अमुकनाम्ना ब्राह्मणानभिवादयति। स्वति भवन्तो ब्रुवन्तु।

ब्राह्मणाः- अमुकनाम्ने आयुष्मते स्वस्ति। एवं त्रिः॥

नामदेवतानामुद्वासनम्॥

## निष्क्रमणम्

**सङ्कल्प-** ममास्य कुमारस्य आयुरभिवृद्धिबीजगर्भ-समुद्भवेनो निबर्हणार्थं निष्क्रमणकर्म करिष्ये॥

तण्डुलपुञ्जेषु दिग्देवताचन्द्रार्कवासुदेवगगनांश्च पूजनम्।

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

शिशोरलङ्करणम्। **पितुरङ्कारोपणम्।** बान्धवैः सह **देवालयगमनम्**- स्वस्त्यात्रेयः। विश्वेदेवाः। त्रिष्टुप्॥ स्व॒स्ति नो॑ मिमीतां---। ---द्यावा॑ पृथि॒वी सु॑चे॒तुना॑॥

समावृत्य, **श्वशुरालयगमनम्** (बान्धवगृहम् वा)- अप्रतिरथ ऐन्द्रः। इन्द्रः। त्रिष्टुप्॥

आ॒शुः शिशा॑नो वृष॒भो न भी॒मो घ॑नाघ॒नः क्षोभ॑णश्चर्षणी॒नाम्। स॒ङ्क्रन्द॑नोऽनिमि॒ष ए॑कवी॒रः श॒तं सेना॑ अजयत्सा॒कमिन्द्रः॑॥

निवृत्य, प्राङ्गणे **सूर्यदर्शनम्**- वसिष्टः मैत्रावरुणिः। सूर्यः। पुर उष्णिक्॥ तच्चक्षु॑र्दे॒वहि॑तं शु॒क्रमु॒च्चर॑त्। पश्ये॑म श॒रदः॑ श॒तं जीवे॑म श॒रदः॑ श॒तम्॥

रात्रावग्निचन्द्रादीनां दर्शनम्- चन्द्रार्कयोर्दिगीशानां दिशाञ्च गगनस्य च। निक्षेपार्थमिमं दद्मि तेऽमुं रक्षन्तु सर्वदा॥ अप्रमत्तं प्रमत्तं वा दिवारात्रा- वथापि वा। रक्षन्तु सततम् सर्वे देवाः शक्रपुरोगमाः॥

## अन्नप्राशनम्

**सङ्कल्प**- ममास्य कुमारस्य मातृगर्भमलप्राशनशुद्ध्यन्नाद्य-ब्रह्मवर्चसायुरिन्द्रियलक्षणसिद्ध्यर्थमन्नप्राशनकर्म करिष्ये॥

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

सौवर्णरजतकांस्यान्यतमपात्रे क्षीराज्यदधिमधुमिश्रितमन्नं निधाय, मातुरुत्सङ्गे बालं प्राङ्मुखोपविश्य, ससुवर्णहस्तेन

**अन्नप्राशनम्-** नलकूबरः। अन्नपतिः। उपरिष्टाद्बृहती॥

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः।

प्र प्रदातारं तारिष ऊर्जन्नो धेहि द्विपदे शं चतुष्पदे॥

जलप्राशनम्। सभापूजनम्। नीराजनम्। आचार्येभ्यः कर्मसाङ्गतादक्षिणा। सुवर्णादिद्रव्यदानम्। कृष्णार्पणम्। ब्राह्मणभोजनम्। आशीर्वचनम्॥

---

**कारिका-** पुण्याहाभ्युदये कृत्वा प्राशनं मधुसर्पिषः। मेधामंसाभिमर्शश्च आघ्राणं स्तन्यपायनम्। चिन्तनं लेखनश्चैव पूजनं नामभोधनम्। दिगीशाराधनं यानं देवबन्धुगृहस्य च। अर्केक्षणं तथा रात्रौ सोमताराक्ष-दर्शनम्। प्राशयेद्दधिमध्वाज्यमन्नश्चान्नपते इति॥

(होमकरणपक्षे जातके प्रबलः, नामकरणे पार्थिवः, अन्नाशने शुचिरित्यग्नयः। अग्निं इन्द्रं प्रजापतिं विश्वान्देवान् ब्रह्माणञ्चाज्येन हुत्वा, स्विष्टकृत्पूर्वमेव सम्स्कारान् कुर्यात्)॥

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777

(मार्गशीर्षादि) कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः। उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः॥ योगीशः पुण्डरीकाक्षो मासनामान्यनुक्रमात्। मार्गशीर्षे च वाग्देवी पुष्ये पद्मावती भवेत्॥ श्रीदेवी चैव सावित्री भूमी कल्याणिका स्मृता। सत्यभामा पुण्यवती रूपिणी चेन्दुमत्यपि॥ चन्द्रावती च लक्ष्मी च स्त्रीनामकरणे बुदुः॥

| | | |
|---|---|---|
| अश्वि-चिचेचोला। | मखा-ममिमुमे। | मूला-येयोबबि। |
| भरणी-लिलुलेलो। | पुब्बा-मोटटिटु। | पूर्वाषाडा-बुधभढ। |
| कृत्तिका-अइउए। | उत्तरा-टेटोपपि। | उषाडा-बेबोदजि। |
| रोहिणी-ओवविवु। | हस्ता-पूषणठ। | श्रवण-शिशुशेशो। |
| मृग-बेबोककि। | चित्रा-पेपोररि। | धनिष्ठा-गगिगुगे। |
| आर्द्रा-कुघङच। | स्वाति- रुरेरोत। | शतभि-गोससिसु। |
| पुनर्वसु-केकोहहि। | बिशा-तितुतेतो। | पूभाद्रा-सेसोददि। |
| पुष्य-हुहेहोड। | अनुराधा-ननिनुने। | उभाद्रा-दुजञथ। |
| आश्लेषा-डिडुडेडो। | ज्येष्ठा-नोययियु। | रेवति-देदोचचि॥ |

अश्वलायनीयस्मृत्यनुसारी जातकर्मनामकरणनिष्क्रमणान्नाशन विधिः।